# 25. पञ्चविंशः पाठः
## रथयात्रा

सप्तमी-विभक्तिः

श्रीजगन्नाथदेवस्य रथयात्रा विश्वप्रसिद्धा अस्ति । एषा यात्रा प्रतिवर्षम् आषाढे मासे, पुरुषोत्तमक्षेत्रे प्रचलति । अस्यां यात्रायां भागं ग्रहीतुं भारतवर्षस्य विभिन्नेभ्यः प्रदेशेभ्यः विदेशभ्यः च अनेके भक्ताः पर्यटकाः च पुरीम् आगच्छन्ति । ते पुरीम् आगत्य त्रिषु रथेषु जगन्नाथं, बलभद्रं सुभद्रां च दृष्ट्वा धन्याः भवन्ति । अस्माकं भारतीयपरम्परायाम् एवं प्रसिद्धिः अस्ति यत् "रथस्थस्य जगन्नाथस्य दर्शनात् पुनर्जन्म न भवति" इति । अस्माकं भारतीयानां जगन्नाथ-बलभद्रयोः सुभद्रायां च महती श्रद्धा अस्ति । वयं तेषु, अन्येषु देवेषु देवतासु च पूर्णरूपेण विश्वसिमः ।

पुरुषोत्तमक्षेत्रस्य समीपे गुण्डिचामन्दिरम् अस्ति । देवी गुण्डिचा जगन्नाथस्य मातृष्वसा भवति । त्रयाणां देवानां रथाः सिंहद्वारात् आरभ्य गुण्डिचामन्दिरं यावत् गच्छन्ति । देव्याः सुभद्रायाः रथः अग्रजयोः रथयोः मध्ये चलति । नवदिनानि यावत् एते त्रयः गुण्डिचामन्दिरे तिष्ठन्ति । तत्र गत्वा भक्ताः देवानां दर्शनं कुर्वन्ति । भजनं कीर्तनं च कुर्वन्ति । रथयात्रायाः पूर्वं पुर्याः गजपतिराजः त्रिषु रथेषु गत्वा सुवर्णसम्मार्जन्या रथान् परिष्करोति । अनन्तरं तेषु सुगन्धजलं सिञ्चति । भक्ताः "जयतु जगन्नाथः" इति उक्त्वा रथस्य रज्जुं कर्षन्ति । न केवलं जगन्नाथस्य, अपि तु भारतवर्षे अन्येषां देवानाम् अपि रथयात्राः भवन्ति । परन्तु तासु सर्वासु रथयात्रासु जगन्नाथस्य रथयात्रा विशिष्टा । एषः रथयात्रोत्सवः विश्वस्य जनान् पुरीं प्रति आकर्षति । पुरुषोत्तमक्षेत्रे वर्तमानः समुद्रः अपि पर्यटकानाम् आकर्षणबिन्दुः भवति ।

सुभाषितानि -

अनभ्यासे विषं विद्या अजीर्णे भोजनं विषम् ।
विषं गोष्ठी दरिद्रस्य भोजनान्ते जलं विषम् ।। 1 ।।

विद्या मित्रं प्रवासेषु माता मित्रं गृहेषु च ।
व्याधितस्यौषधं मित्रं धर्मः मित्रं मृतस्य च ।। 2 ।।

मातृवत् परदारेषु परद्रव्येषु लोष्टवत् ।
आत्मवत् सर्वभूतेषु यः पश्यति स पश्यति ।। 3।।

ध्यानेन पठन्तु -

एतत् (पुं.) एतस्मिन् एतयोः एतेषु
(नपुं.) एतस्मिन् एतयोः एतेषु
(स्त्री.) एतस्याम् एतयोः एतासु